[७०१] रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् । (म. भा. ३. १०८)

आरेवान् ।

[७०२] त्रेश्च प्रतिषेधो वक्तव्यः । (म. भा. ३. १०८)

'त्रिवतीर्याज्यानुवाक्या भवति' (काठ.सं. ११. १) इति ॥

## नामन्यतरस्याम् । (१७७/३७२३)

ह्रस्वग्रहणमनुवर्तते, मतुब्ग्रहणं च । तेन मतुपा ह्रस्वो विशेष्यते । मतुपि यो ह्रस्वः, तदन्तादन्तोदात्तादन्यतरस्यां नाम् उदात्तो भवति । अग्नीनाम्, अग्नीनाम् । वायूनाम्, वायूनाम् । [1]कर्तॄणाम्, कर्तॄणाम् । मतुपा ह्रस्वविशेषणं किम् ? [2]भूतपूर्वेऽपि[3] ह्रस्वे यथा स्यात्[4] । अन्यथा हि साम्प्रतिक एव स्यात्, तिसृणाम्, चतसृणाम् (म.भा.३. १०९) [5]इति । सनुट्कस्य ग्रहणं किम् ? धेन्वाम् । शकटयाम् । 'उदात्तयणो हल्पूर्वात्' (६. १. १७४/३७२०) इत्ययमन्तोदात्तः । ह्रस्वात् इत्येव, कुमारीणाम् । अन्तोदात्तात् इत्येव, त्रपूणाम् । वसूनाम् ॥

## ङ्याश्छन्दसि बहुलम् । (१७८/३७२४)

ङ्यन्तात् छन्दसि विषये नामुदात्तो भवति बहुलम् । 'देवसेनानामभिभञ्जतीनाम्' (ऋ. १०.१०३.८) । '[6]बह्वीनां पिता' (ऋ. ६. ७५.५) । न च भवति, नदीनां पारे । '[7]जयन्तीनां मरुतः' (ऋ. १०.१०३. ८) ॥

## षट्त्रिचतुर्भ्यो हलादिः । (१७९/३७२५)

अन्तोदात्तात् इत्ये[8]तन्निवृत्तम् । षट्सञ्ज्ञकेभ्यः, त्रि चतुर् इत्येताभ्यां च परा हलादिर्विभक्तिरुदात्ता भवति । षड्भिः । षड्भ्यः । 'पञ्चानाम्' (तै. सं. १. ६. १ .२) । षण्णाम् । 'सप्तानाम्' (ऋ. ८. २८. ५) । त्रि – 'त्रिभिः' (ऋ. १. ३४. २१) । त्रिभ्यः । 'त्रयाणाम्' (तै. सं. ३. ४.३. ८) । चतुर् – '[9]चतुर्भ्यः' (तै. ७. २.११. १) । 'चतुर्णाम्' (ऋ. ८ .७४. १३) । हलादिः इति किम् ? चतस्रः (ऋ. १. ६२. ६) पश्य ॥

## झल्युपोत्तमम् । (१८०/३६८३)

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिः तदन्ते पदे उपोत्तमं उदात्तं भवति । त्रिप्रभृतीनामन्त्यमुत्तमम्, तत्समीपे च यत् तदुपोत्तमम् । पञ्चभिः (तै. सं.५.२.७.५) तपस्तपति । सप्तभिः [10]पराञ् जयति । 'तिसृभिश्च वहसे त्रिंशता' (अ. वे. ७.४.१) । 'चतुर्भिः' (वा. सं. २३.१३) । झलि इति किम् ? 'पञ्चानाम्' (तै. सं. १.६.१.२) । 'सप्तानाम्' (ऋ. ८.२८.५) । उपोत्तमम् इति किम् ? 'षड्भिः' (ऋ. २.१८.४) । 'षड्भ्यः' (तै. सं. ७. २.१३.१) ॥

---

1. हर्तॄणाम् हर्तॄणाम् फ, 2. भूतपूर्वस्य क. 3. ह्रस्वे नास्ति फ. 4. इति इत्यधिकम् फ. 5. इति नास्ति क. 6. उदाहरणमिदं नास्ति क. 7. जुषन्तीनाम् क. 8. एतत् नास्ति फ. 9. चतुर्भ्यः नास्ति फ. 10. पराजयति क.